श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### त्रयोविंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## त्रयोविंशः सर्गः

*राक्षसीभिः सीतायाः प्रबोधनम्*

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः।
सन्दिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह॥ ५.२३.१ ॥

निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते।
राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः॥ ५.२३.२ ॥

ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्छिताः।
परं परुषया वाचा वैदेहीमिदमब्रुवन्॥ ५.२३.३ ॥

पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः।
दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे॥ ५.२३.४ ॥

ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत्।
आमन्त्र्य क्रोधाताम्राक्षी सीतां करतलोदरीम्॥ ५.२३.५ ॥

प्रजापतीनां षण्णां तु चतुर्थोऽयं प्रजापतिः।
मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः॥ ५.२३.६ ॥

पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः।
नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः॥ ५.२३.७ ॥

तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः।
तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि॥ ५.२३.८ ॥

मयोक्तं चारुसर्वाङ्गि वाक्यं किं नानुमन्यसे।
ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत्॥ ५.२३.९ ॥

विवृत्य नयने कोपान्मार्जारसदृशेक्षणा।
येन देवास्त्रयस्त्रिंशद् देवराजश्च निर्जितः॥ ५.२३.१० ॥

तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि।
वीर्योत्सिक्तस्य शूरस्य सङ्ग्रामेष्वनिवर्तिनः।
बलिनो वीर्ययुक्तस्य भार्या त्वं किं न लिप्ससे॥ ५.२३.११ ॥

प्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः।
सर्वासां च महाभागां त्वामुपैष्यति रावणः॥ ५.२३.१२ ॥

समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम्।
अन्तःपुरं तदुत्सृज्य त्वामुपैष्यति रावणः॥ ५.२३.१३ ॥

अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत्।
असकृद् भीमवीर्येण नागा गन्धर्वदानवाः।
निर्जिताः समरे येन स ते पार्श्वमुपागतः॥ ५.२३.१४ ॥

तस्य सर्वसमृद्धस्य रावणस्य महात्मनः।
किमर्थं राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे॥ ५.२३.१५ ॥

ततस्तां दुर्मुखी नाम राक्षसी वाक्यमब्रवीत्।
यस्य सूर्यो न तपति भीतो यस्य स मारुतः।
न वाति स्मायतापाङ्गि किं त्वं तस्य न तिष्ठसे॥ ५.२३.१६ ॥

पुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात्।
शैलाः सुस्रुवुः पानीयं जलदाश्च यदेच्छति॥ ५.२३.१७ ॥

तस्य नैर्ऋतराजस्य राजराजस्य भामिनि।
किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि॥ ५.२३.१८ ॥

साधु ते तत्त्वतो देवि कथितं साधु भामिनि।
गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि॥ ५.२३.१९ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः॥



www.prapatti.com